श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## नारायण कवच



कवच किया जिसने यह धारण
नारायण उसके भव तारण

नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम् ।
देवीं(म्) सरस्वतीं(म्) व्यासं(न्), ततो जयमुदीरयेत् ॥

नामसङ्कीर्तनं(म्) यस्य, सर्वपापप्रणाशनम् ।
प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम् ॥

श्रीमद्भागवतमहापुराणम्

षष्ठः(स्) स्कंधः

अथाष्टमोऽध्यायः

राजोवाच

यया गुप्तः(स्) सहस्राक्षः(स्), सवाहान् रिपुसैनिकान्।
क्रीडन्निव विनिर्जित्य, त्रिलोक्या बुभुजे श्रियम् ।।1।।

सहस् + राक्षः(स्), क्रीडन् + निव

भगवं(व्)स्तन्ममाख्याहि, वर्म नारायणात्मकम्।
यथाऽऽततायिनः(श्) शत्रून्, येन गुप्तोऽजयन्मृधे ।।2।।

भगवं(व्)स् + तन् + ममाख्याहि, गुप्तोऽ+ जयन् + मृधेश्रीशुक उवाच

श्रीशुक उवाच

वृतः(फ्) पुरोहितस्त्वाष्ट्रो, महेन्द्रायानुपृच्छते।
नारायणाख्यं(म्) वर्माह, तदिहैकमनाः(श्) शृणु।।3।।

पुरो+ हितस् + त्वाष्ट्रो, तदिहै+ कमनाः(श्)विश्वरूप उवाच

विश्वरूप उवाच

धौताङ्घ्रिपाणिराचम्य, सपवित्र उदङ्मुखः।
कृतस्वाङ्गकरन्यासो, मन्त्राभ्यां वाग्यतः(श्) शुचिः।।4।।

धौताङ्घ्रि+ पाणि+ राचम्य ,कृतस्वाङ्+ गकरन् + यासो

नारायणमयं(म्) वर्म, सन्नह्येद् भय आगते।
पादयोर्जानुनोरूर्वो- रुदरे हृद्यथोरसि।।5।।

पादयोर् + जानुनोरूर्वो, हृद्य+ थोरसि

मुखे शिरस्यानुपूर्व्या- दोङ्कारादीनि विन्यसेत्।
ॐ नमो नारायणायेति, विपर्ययमथापि वा।।6।।

शिरस्या+ नुपूर्+ व्या, विपर् + यय + मथापि

करन्यासं(न्) ततः(ख्) कुर्याद्, द्वादशाक्षरविद्यया।
प्रणवादियकारान्त- मङ्गुल्यङ्गुष्ठपर्वसु।।7।।

द्वादशा+ क्षर+ विद्यया, मङ्गुल्यङ् +गुष्ठ + पर्वसु

न्यसेद्धृदय ओङ्कारं(म्), विकारमनु मूर्धनि।
षकारं (न्) तु भ्रुवोर्मध्ये, णकारं(म्) शिखया दिशेत्।।8।।

न्यसेद् + धृदय, भ्रुवोर् + मध्ये

वेकारं(न्) नेत्रयोर्युञ्ज्यान्- नकारं(म्) सर्वसन्धिषु।
मकारमस्त्रमुद्दिश्य, मन्त्रमूर्तिर्भवेद् बुधः।।9।।

नेत्रयोर् + युञ्ज्यान्, मकार+ मस्त्र+ मुद्दिश्य

सविसर्गं(म्) फडन्तं(न्) तत्, सर्वदिक्षु विनिर्दिशेत्।
ॐ विष्णवे नम इति।।10।।

विनिर्+ दिशेत्

आत्मानं (म्) परमं(न्) ध्यायेद्, ध्येयं(म्) षट्शक्तिभिर्युतम्।
विद्यातेजस्तपोमूर्ति- मिमं(म्) मन्त्रमुदाहरेत्।।11।।

षट्+ शक्ति+ भिर्+ युतम्,

विद्या+ तेजस्+ तपो+ मूर्ति

ॐ हरिर्विदध्यान्मम सर्वरक्षां(न्),
न्यस्ताङ्घ्रिपद्मः(फ्) पतगेन्द्रपृष्ठे।
दरारिचर्मासिगदेषुचाप-
पाशान् दधानोऽष्टगुणोऽष्टबाहुः।।12।।

हरिर् + विदध्यान्, न्यस्+ ताङ्घ्रि+ पद्मः(फ्),

दरारि+ चर्मा+ सिगदेषु+ चाप

दधा+ नोऽष्ट+ गुणोऽष्ट+ बाहुः

जलेषु मां(म्) रक्षतु मत्स्यमूर्तिर्-

यादोगणेभ्यो वरुणस्य पाशात्।

स्थलेषु मायावटुवामनोऽव्यात्,

त्रिविक्रमः(ख्) खेऽवतु विश्वरूपः।।13।।

माया+ वटु+ वामनोऽव्यात्

दुर्गेष्वटव्याजिमुखादिषु प्रभुः(फ्),

पायान्नृसिं(व्)होऽसुरयूथपारिः।

विमुञ्चतो यस्य महाट्टहासं(न्),

दिशो विनेदुर्न्यपतं(व्)श्च गर्भाः।।14।।

दुर्गेष् + वटव्या+जिमुखा+ दिषु, पायान्+ नृसिंहोऽ+ सुरयूथ+ पारिः

विनेदुर्+ न्य+ पतं(व्)श्च

रक्षत्वसौ माध्वनि यज्ञकल्पः(स्),

स्वदं(व्)ष्ट्रयोन्नीतधरो वराहः।

रामोऽद्रिकूटेष्वथ विप्रवासे,

सलक्ष्मणोऽव्याद् भरताग्रजोऽस्मान्।।15।।

स्वदंष्ट्र+ योन् + नीत+ धरो, रामोऽद्रि+ कूटेष्+ वथ,

भरता+ ग्रजोऽ+ स्मान्

मामुग्रधर्मादखिलात् प्रमादान्-

नारायणः(फ्) पातु नरश्च हासात्।

दत्तस्त्वयोगादथ योगनाथः(फ्),

पायाद् गुणेशः(ख्) कपिलः(ख्) कर्मबन्धात्।।16।।

मामुग्र+ धर्मा+ दखिलात्, दत्तस्त्व+ योगा+ दथ

सनत्कुमारोऽवतु कामदेवाद्-

धयशीर्षा मां(म्) पथि देवहेलनात्।

देवर्षिवर्यः(फ्) पुरुषार्चनान्तरात्,

कूर्मो हरिर्मां(न्) निरयादशेषात्।।17।।

सनत् + कुमारोऽ+ वतु,

पुरुषार् + चनान् + तरात्, निरया+ दशेषात्

धन्वन्तरिर्भगवान् पात्वपथ्याद् ,

द्वन्द्वाद् भयादृषभो निर्जितात्मा।

यज्ञश्च लोकादवताज्जनान्ताद्,

बलो गणात् क्रोधवशादहीन्द्रः।।18।।

धन्वन्तरिर् + भगवान्, भया+ दृषभो,

लोका+ दवताज् + जनान्ताद्, क्रोध+ वशा+ दहीन्द्रः

द्वैपायनो भगवानप्रबोधाद् ,

बुद्धस्तु पाखण्डगणात् प्रमादात्।

कल्किः(ख्) कले:(ख्) कालमलात् प्रपातु,

धर्मावनायोरुकृतावतारः।।19।।

भगवान+ प्रबोधाद्, पाखण्ड+ गणात्, धर्मा+ वनायो+ रुकृता+ वतारः

मां(ङ्) केशवो गदया प्रातरव्याद्,

गोविन्द आसङ्गवमात्तवेणुः।

नारायणः(फ्) प्राह्ण उदात्तशक्तिर् -

मध्यन्दिने विष्णुररीन्द्रपाणिः।।20।।

प्रात+ रव्याद्, आसङ्गव+ मात्त+ वेणुः, उदात्त+ शक्तिर्, विष्णु+ ररीन्द्र+ पाणिः

देवोऽपराह्णे मधुहोग्रधन्वा ,

सायं(न्) त्रिधामावतु माधवो माम्।

दोषे हृषीकेश उतार्धरात्रे,

निशीथ एकोऽवतु पद्मनाभः।।21।।

मधुहो+ ग्रधन्वा, त्रिधामा + वतु

श्रीवत्सधामापररात्र ईशः(फ्),

प्रत्यूष ईशोऽसिधरो जनार्दनः।

दामोदरोऽव्यादनुसन्ध्यं(म्) प्रभाते,

विश्वेश्वरो भगवान् कालमूर्तिः।।22।।

श्रीवत्स+ धामा+ परात्र, दामोदरोऽ+ व्या+ दनु+ सन्ध्यं(म्)

चक्रं(म्) युगान्तानलतिग्मनेमि,

भ्रमत् समन्ताद् भगवत्प्रयुक्तम्।

दन्दग्धि दन्दग्ध्यरिसैन्यमाशु ,

कक्षं(म्) यथा वातसखो हुताशः।।23।।

युगान्ता+ नल+ तिग् + मनेमि,भगवत् + प्रयुक्तम्

दन्दग्+ ध्यरि+ सैन्य + माशु

गदेऽशनिस्पर्शनविस्फुलिङ्गे
निष्पिण्ढि निष्पिण्ढ्यजितप्रियासि।
कूष्माण्डवैनायकयक्षरक्षो-
भूतग्रहां(व्)श्चूर्णय चूर्णयारीन्।।24।।

गदेऽ+ शनिस्पर्शन + विस्फुलिङ्गे, निष् + पिण्ढ्य+ जित+ प्रियासि

कूष्माण्ड+ वैनायक+ यक्षरक्षो, भूत+ ग्रहां(व्)श् + चूर्णय

त्वं(म्) यातुधानप्रमथप्रेतमातृ-
पिशाचविप्रग्रहघोरदृष्टीन्।
दरेन्द्र विद्रावय कृष्णपूरितो,
भीमस्वनोऽरेर्हृदयानि कम्पयन्।।25।।

यातुधान+ प्रमथ+ प्रेतमातृ, पिशाच+ विप्र+ ग्रह+ घोरदृष्टीन्

भीम+ स्वनोऽरेर् + हृदयानि

त्वं(न्) तिग्मधारासिवरारिसैन्य-
मीशप्रयुक्तो मम छिन्धि छिन्धि।
चक्षूं(व्)षि चर्मञ्छतचन्द्र छादय,
द्विषामघोनां(म्) हर पापचक्षुषाम्।।26।।

तिग्म+ धारा+ सिवरारि+ सैन्य, मीश+ प्रयुक्तो, चर्मञ्+ छत+ चन्द्र ,

द्विषा+ मघोनां(म्)

यन्नो भयं(ङ्) ग्रहेभ्योऽभूत्, केतुभ्यो नृभ्य एव च।
सरीसृपेभ्यो दं(व्)ष्ट्रिभ्यो, भूतेभ्यों(व्)ऽहोभ्य एव वा।।27।।

सरी+ सृपेभ्यो

सर्वाण्येतानि भगवन्- नामरूपास्त्रकीर्तनात्।
प्रयान्तु सं(ङ्)क्षयं(म्) सद्यो, ये नः(श्) श्रेयः(फ्) प्रतीपकाः।।28।।

नाम+ रूपास्त्र+ कीर्तनात्

गरुडो भगवान् स्तोत्रस्, तोभश्छन्दोमयः(फ्) प्रभुः।
रक्षत्वशेषकृच्छ्रेभ्यो, विष्वक्सेनः(स्) स्वनामभिः।।29।।

तोभश्+ छन्दोमयः,

रक्षत्व+ शेष+ कृच्छ्रेभ्यो

सर्वापद्भ्यो हरेर्नाम- रूपयानायुधानि नः।
बुद्धीन्द्रियमनः(फ्) प्राणान्, पान्तु पार्षदभूषणाः।।30।।

रूप+ याना+ युधानि,

बुद्धीन्द्रिय + मनः

यथा हि भगवानेव, वस्तुतः(स्) सदसच्च यत्।
सत्येनानेन नः(स्) सर्वे, यान्तु नाशमुपद्रवाः।।31।।

नाश+ मुपद्रवाः

यथैकात्म्यानुभावानां(म्), विकल्परहितः(स्) स्वयम्।
भूषणायुधलिङ्गाख्या, धत्ते शक्तीः(स्) स्वमायया।।32।।

यथै+ कात्म्या+ नुभावानां(म्), भूषणा+ युध+ लिङ्गाख्या

तेनैव सत्यमानेन, सर्वज्ञो भगवान् हरिः।
पातु सर्वैः(स्) स्वरूपैर्नः(स्), सदा सर्वत्र सर्वगः।।33।।

विदिक्षु दिक्षूर्ध्वमधः(स्) समन्ता-
दन्तर्बहिर्भगवान् नारसिं(व्)हः।
प्रहापयँल्लोकभयं(म्) स्वनेन,
स्वतेजसा ग्रस्तसमस्ततेजाः।।34।।

दिक्षूर्+ ध्वमधः(स्), दन्तर्+ बहिर् + भगवान्

प्रहा+ पयँल्लोक+ भयं(म्),ग्रस्त+ समस्त+ तेजाः

मघवन्निदमाख्यातं(म्), वर्म नारायणात्मकम्।
विजेष्यस्यञ्जसा येन, दं(व्)शितोऽसुरयूथपान्।।35।।

मघवन् + निद+ माख्यातं(म्),

विजेष् + यस्यञ् + जसा

दं(व्)शितोऽ+ सुर+ यूथपान्

एतद् धारयमाणस्तु, यं(म्) यं(म्) पश्यति चक्षुषा।
पदा वा सं(व्)स्पृशेत् सद्यः(स्), साध्वसात् स विमुच्यते।।36।।

धारय+ माणस्तु

न कुतश्चिद् भयं(न्) तस्य, विद्यां(न्) धारयतो भवेत्।
राजदस्युग्रहादिभ्यो, व्याघ्रादिभ्यश्च कर्हिचित्।।37।।

कुतश् + चिद्, राज+ दस्यु+ ग्रहा+ दिभ्यो, व्याघ्रा+ दिभ्यश्च

इमां(म्) विद्यां(म्) पुरा कश्चित्, कौशिको धारयन् द्विजः।
योगधारणया स्वाङ्गं(ञ्), जहौ स मरुधन्वनि।।38।।

योग+ धारणया, मरु+ धन्वनि

तस्योपरि विमानेन, गन्धर्वपतिरेकदा।
ययौ चित्ररथः(स्) स्त्रीभिर्- वृतो यत्र द्विजक्षयः।।39।।

गन्धर्व+ पति+ रेकदा

गगनान्न्यपतत् सद्यः(स्), सविमानो ह्यवाक्शिराः।
स वालखिल्यवचना- दस्थीन्यादाय विस्मितः।
प्रास्य प्राचीसरस्वत्यां(म्), स्नात्वा धाम स्वमन्वगात्।।40।।

गगनान् + न्य+ पतत्, ह्यवाक् + शिराः,

वाल+ खिल्य+ वचना दस्थीन् + यादाय,

प्राची+ सरस्वत्यां(म्),स्वमन् + वगात्

श्रीशुक उवाच

य इदं(म्) शृणुयात् काले, यो धारयति चादृतः।
तं(न्) नमस्यन्ति भूतानि, मुच्यते सर्वतो भयात्।।41।।

एतां(म्) विद्यामधिगतो, विश्वरूपाच्छतक्रतुः।
त्रैलोक्यलक्ष्मीं(म्) बुभुजे, विनिर्जित्य मृधेऽसुरान्।।42।।

विद्या+ मधिगतो, विश्व+ रूपाच् + छत+ क्रतुः

त्रैलोक्य+ लक्ष्मीं(म्), विनिर् + जित्य

इति श्रीमद्भागवते महापुराणे पारमहं(व्)स्यां(म्) सं(व्)हितायां(म्)
षष्ठस्कन्धे नारायणवर्मकथनं(न्) नामाष्टमोऽध्याय:।।

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्) पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।
ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः।।

